**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तुरीया परीक्षा**

**प्रथमपत्रिका**

दिनाङ्कः -28-01-2018 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि</u>

1 **पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

१. कौत्सस्य गुरुः कः ?

२. विनेयाग्रणीः श्रीशङ्कराचार्यशिष्यः कः ?

३. स्वगुणेन युधिष्ठिरः पश्चात् कः इति पप्रथे ?

४. हैडिम्बेयः कः ?

५. हनुमान् कस्मिन् काले लङ्कां प्रविष्टः ?

६. अभिमन्योः प्रपौत्रः कः ?

७. विदर्भराजः कः ?

८. विश्वमहाकविः कः ?

2 **पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. धीमान् हनुमान् कीदृशं चन्द्रमपश्यत् ?

२. नलेन गृहीतः हंसः तं किमब्रवीत् ?

३. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

४. विद्यायाः महत्त्वं कीदृशम् ?

५. शङ्करावतारसमये ग्रहाणां स्थितिः कीदृशी आसीत् ?

६. भगवतः सप्तत्व-सम्बन्धं विशदयत ?

७. पाण्डुनृपेण ताडितः मृगरूपधरः ऋषिः तं किमाह ?

3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत । 8

१. कुन्त्या पृष्टः द्विजः स्वपरिदेवननिदानं किमाह ?

२. रघोरौदार्यं विशदयत ।

३. हस्तामलकस्य पूर्ववृत्तं वर्णयत।

४. भगवता वेदव्यासेन उक्तः द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

4 वाक्यत्रयं सप्रसङ्गं विवृणुत । 9

१. " विशिष्टयोस्सम्बन्धो हि गुणवान् भवति "

२. " राजन्, तव शापस्य विमोचनकालः सन्निहितः "

३. " सज्जा भव कुलिशप्रहारं कुसुमाञ्जलिना धर्तुम् "

४. " भगवन्नस्ति मे भवतः सूत्रभाष्यस्य वार्तिककरणाभिलाषः "

५. " पर्णाशी बहुनियमान् समञ्चति स्म "

5 द्वयोः भावं विशदयत । 8

१. साफल्यं कृततपसो विधातुकामः सद्विप्रान् बहुरुचि भोजयाञ्चकार ।
सद्भक्त्या तदशितशेषभोक्तृभर्तुः शिष्टं साऽन्वशितवती दधार गर्भम् ॥

२. यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥

३. शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रस्तथा प्रकाशो विरराज चन्द्रः ॥

४. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥

6 श्लोकं पूर्णं लिखत । 4

१. एते सत्पुरुषाः ________________ जानीमहे ।

२. दानं भोगो ____________________ भवति ।

7 एकस्य कवेः देश-काल-कृति-महत्त्वादीनाम् विषये लिखत । 4

१. कालिदासः २. लक्ष्मणसूरिः

8 एकस्य लघुटिप्पणीं लिखत । 4

१. श्रृङ्गेरीक्षेत्रं २. पाण्डवानां जन्म

9 चत्वारि पदानि वाक्ये योजयत । 4

१. राजन् २. गुरवे ३. प्राणिपत्य ४. आसीत् ५. विचक्षणः

10 चतुर्णां रूपाणि विवेचयत । 4

१. त्यक्ष्यामि २. जज्ञे ३. भैमी ४. सञ्जातः ५.पाराशर्यः

11 चतुर्णां पर्यायपदानि लिखत । 4

१. सङ्कर्षणः २. वर्त्म ३. गङ्गा ४. ईड्यम् ५. शार्दूलः

12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत । 4

१. दीर्घकेशाः २. इन्द्राग्नियमवरुणाः ३ त्रिलोकी

४ यथाकालम् ५. प्रसूतिवेदनापरिखिन्नायाः ६. चक्रपाणिः

13 चतुर्णां सन्धिं विभज्य नाम लिखत । 4

१. त्रिशङ्कुरिव २. तच्छ्रुत्वा ३. अधीयन्नर्जुनः ४. नातिदूरे ५. सोऽयम्

14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. ददर्श २. अवर्धत ३.यतिष्ये ४. ददाति

15 **द्वयोः व्याकरणविशेषं लिखत ।** 4

१. व्यजयत २. स्वस्त्यस्तु ते ३. नरकात् त्रायते ४. विदर्भराजस्य

16 **समासमेकं सलक्षणं विशदयत ।** 4

१. द्वन्द्व समासः २. द्विगुसमासः

17 **चतुर्थं पदं लिखत ।** 4

१. पुरुषसिंहः - कर्मधारयः :: राजपुरुषः ______

२. अर्जुनः - कुन्ती :: भीष्मः ______

३. शतानीकः – विष्णुमती :: अभिमन्युः ______

४. उदयनचरितम् – अनन्ताचार्यः :: विष्णुस्तुतिः ______

18 **इतरवाक्यानि लिखत ।** 4

१. ______ ______ आहुः ।

२. अपृच्छत् ______ ______ ।

३. महात्मा ______ ______ ।

४. मे ______ ______ ।

19 **रिक्तस्थानानि पूरयत ।** 4

१. प्रारभ्यविघ्नविहिताः विरमन्ति __________ ।

२. क्लेशापहाय __________ पार्थसारथये नमः।

३. देवाः तुष्टाः नलाय __________ वरान् ददुः।

४. 'नैष्कर्म्यसिद्धिः' इत्याख्यग्रन्थस्य रचयिता______ ।

20 **प्रयोगपरिवर्तनं कुरुत ।** 2

१. दुर्वासाः कुन्त्या सत्कृतः ।

२. श्रुणु तत्र कारणम् ।

---------

# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः- 28-01-2018 अङ्काः - 50

पूर्वाह्णे –1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत । 5

१. प्रतिज्ञापालनम् २. गणतन्त्रोत्सवः ३. संस्कृते विज्ञानम्

2 (अ) चतुर्थी विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) दशलकाराः के ? कस्मिन् काले, अर्थे च तेषां उपयोगः भवति ? सोदाहरणं स्पष्टीकुरुत । 4

3. (अ) अर्थान्तरन्यासालङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) "प्रारभ्यते न खलु विघ्नभयेन नीचैः "- एतस्य वृत्तं सलक्षणं सप्रस्तारं च निरूपयत । 4

4 उत्तरं लिखत । (त्रयाणामेव) 3

१. भावे प्रयोगे क्रियापदं कस्मिन् पुरुषे, वचने च भवति ?

२. अर्धविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

३. आदिमध्यावसानेषु के गौरवं यान्ति ?

४. काव्यम् नाम किम् ?

5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत । 6

१. जीयात् २. अभविष्यत् ३. लब्धा ४. चक्रे

6 प्रयोगपरिवर्तनं कुरुत । 4

१. वयं स्थास्यामः। २. सः त्वां पश्यति। ३. कृष्णेन धनं दीयते ।

४. रामः पीठे उपविशति।

7 वाक्यदोषं परिहरत । 4

१. अर्जुनः द्रोणेन अधीते ।

२. धनस्य अन्तरेण कार्यं न सिध्दयति ।

३. प्रधानमन्त्री भाषणं विरमति ।

४. सिंहः वने अधितिष्ठति ।

8 टिप्पणीं लिखत । (एकस्य) 2

१. सति सप्तमी ।

२. उपमालङ्कारः

9 मातृभाषया अनुवदत । 5

१. गुरोः प्रसादेन विद्वांसः भूयास्म ।

२. प्राणिषु मानवः अतिश्रेष्ठः ।

३. कः खलु गुरुद्रोहमकरिष्यत् ?

४. सेवासु गुरुसेवा प्रशस्ता ।

५. चैत्राय शतं रूप्यकाणि धारयति मैत्रः ।

10 संस्कृतभाषया परिवर्तयत । 5

1. ಕಾಳಿದಾಸನು ರಘುವಂಶವೆಂಬ ಕಾವ್ಯವನ್ನು ರಚಿಸಿದನು.

   Kalidasa wrote a kavya named Raghuvamsa.

2. ಸೀತೆಯು ನಾಚಿಕೆಪಡುತ್ತಾಳೆ. Seetha feels shy.

3. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ. May you all live long.

4. ಹಸುಗಳನ್ನು ಕರೆಯುವಾಗ ಅವನು ಹೋದನು.

   He went when the cows were being milked.

5. ಅವನು ವಿನಯವಾಗಿ ಮಾತುನಾಡುತ್ತಾನೆ. He talks with humility.

--------------